# 17. आचार्यः चरकः

[In ancient India there have been many great Acharyas who have contributed in great measure to many branches of learning. Among these many of them are present with us even today through their writings in their branch of knowledge. One such teacher is Charaka.

Acharya Charaka was a great scholar in Ayurveda. He laid the foundation of the science of medicine. As with many other scholars, in the case of Charaka too, we have very little knowledge about his personal life. But we do have the book written by him with us to this day. The book written by him in Sanskrit is called 'चरकसंहिता'. Anyone who wants to study Ayurveda will certainly have to read this book.

In this lesson we will be introduced to this great scholar of Ayurveda. In addition to that, it is also necessary to imbibe an advice of his. As a body without disease is really precious, each one of us should learn how we can lead a life free from diseases. We can gain this important knowledge from this lesson.]

चरकनाम्ना प्रसिद्धः आचार्यः ख्रिस्तस्य प्रथमशताब्द्यां आयुर्वेदस्य महान् पण्डितः । सः कनिष्कनृपतेः राजवैद्यः आसीत् ।

अस्य आचार्यस्य चरकसंहितानामकः सुप्रसिद्धः ग्रन्थः वर्तते । आयुर्वेदस्य प्राचीनतमेषु विश्वविख्यातेषु



च ग्रन्थेषु अस्य गणना भवति ।

अस्मिन् ग्रन्थे सूत्रस्थानम्, निदानस्थानम्, विमानस्थानम्, शारीरस्थानम्, इन्द्रियस्थानम्, चिकित्सास्थानम्,

कल्पस्थानम्, सिद्धिस्थानम् चेति अष्टौ प्रकरणानि सन्ति । एतेषु सर्वेषु प्रकरणेषु सम्मिल्य विंशत्युत्तर-एकशतम् (120) अध्यायाः सन्ति । अस्य ग्रन्थस्य प्रमाणं द्वादशसहस्रश्लोका-त्मकं वर्तते । अत्र प्रायः सहस्रद्वयम् औषधयोगानां विस्तृतम् व्याख्यानमस्ति । अस्मिन् व्याख्याने ज्वर-रक्तपित्त-उन्माद-अतिसार-प्रमेहादीनाम् उदर-शिरो-हृदयादीनां च रोगाणां निवारकानि विनाशकानि च औषधानि उल्लिखितानि सन्ति । एवं हि मन्यते यत् भारते औषधविज्ञानस्य प्रवर्तकः अयमेवाचार्यः ।

निखिलमपि आयुर्वेदसाहित्यम् आचार्यस्य चरकस्य उच्छिष्टमस्ति । अथ च आयुर्वेदशास्त्रीयं यत् ज्ञानं चरकसंहितायां वर्तते तदेव सर्वत्र वर्तते, चरकसंहितायां यत् नास्ति, तत् कुत्रापि न वर्तते ।

अस्य केचन उपदेशाः स्मर्तव्याः सन्ति । तद्यथा – मनुष्यः केन प्रकारेण रोगरहितः भवितुम् अर्हतीति विषये उपदिशति आचार्यः –

**नरो हिताहारविहारसेवी समीक्ष्यकारी विषयेष्वसक्तः ।**
**दाता समः सत्यपरः क्षमावानाप्तोपसेवी च भवत्यरोगी ।।**

अर्थात् यः नरः हितस्य आहारस्य विहारस्य च सेवनं करोति, सर्वं कार्यं समीक्ष्य करोति, विषयेषु नितरामासक्तः न भवति, यः दानं करोति, व्यवहारे समत्वं क्षमाभावं च आचरति, आप्तजनानां सेवां करोति तादृशः नरः अरोगी अर्थात् स्वस्थः भवति ।

अत्र एकः प्रश्नः । 'किम् औषधं विना सम्यक् व्यवहारेणापि जनः रोगरहितः भवितुमर्हती' ति ? तस्येदमुत्तरम् । यदा रोगः शरीरे प्रविष्टो भवति, तदा औषधस्य आवश्यकता भवति । परन्तु शरीरे रोगस्य प्रवेशः एव न स्यात् एतदर्थं मानवेन सम्यक् व्यवहारः करणीय एव । व्यवहारस्यापि स्वास्थ्ये प्रभावो भवतीत्येषः चरकाचार्यस्य उपदेशः ।

## Glossary

**Noun : (masc.) : ख्रिस्तः** Jesus Christ **औषधयोगः** medicine (Medicine prepared from the mixture of different herbs is called 'Aushadha Yoga') **ज्वरः** fever **रक्तपित्तः** leprosy **उन्मादः** a kind of disease related to mind, madness **अतिसारः** dysentry **प्रमेहः** diabetes **प्रवर्तकः** founder

**(Fem.) : प्रथम शताब्दी** first century **उक्तिः** statement, saying

**(Neu.) : तदानीन्तनम्** of that time **उदरम्** stomach **निवारकम्** that which removes, cures

**Pronoun : अयम्** this (masc.) **अस्य** of this (masc.) **एतेषु सर्वेषु** among all these (masc. and neu.) **अस्मिन्** in this (masc.) **केन** by whom (masc.) **यः** who (masc.)

**Adjective : प्राचीनतम** most ancient **प्रथमा** first **द्वितीया** second **निखिल** whole **तादृश** like him/that **प्रविष्ट** who has entered

**Adverb : प्रायः** generally **इह** here **अन्यत्र** elsewhere **क्वचित्** somewhere, sometime **कुत्रापि** anywhere **सर्वत्र** everywhere **केचन** some (masc.) **तद्यथा** just as

**Participle :** सम्मिल्य (सम् + मिल् + त्वा > य) अधिकृत्य (अधि + कृ + त्वा > य) भवितुम् (भू-भव् + तुम्) समीक्ष्य (सम् + ईक्ष् + त्वा > य) ।

**Compound :** **राजवैद्यः** (वैद्यानाम् राजा राजवैद्यः । or राज्ञः वैद्यः राजवैद्यः । षष्ठी तत्पुरुष) **विश्वविख्यातेषु** (विश्वस्मिन् विख्यातः विश्वविख्यातः, तेषु । षष्ठी तत्पुरुष) **औषधयोगानाम्** (औषधानाम् योगः औषधयोगः, तेषाम् । षष्ठी तत्पुरुष) **औषधविज्ञानस्य** (औषधस्य विज्ञानम् औषधविज्ञानम्, तस्य । षष्ठी तत्पुरुष) **रोगरहितः** (रोगेण रहितः रोगरहितः । तृतीया तत्पुरुष)

## Notes

**(1) Meaning : कनिष्कनृपतेः** of king named Kanishka **ग्रन्थस्य प्रमाणम्** size of a book / volume (In ancient time there was a method / system to measure the size of a book. In order to know the size of a book, all letters written in the book were counted and divided by 32 or sometimes by 8. Whatever figure was there was considered to be the size of the book.) **द्वादशसहस्त्रश्लोकात्मकः** a volume / book having twelve thousand verses **सहस्त्रद्वयम्** two thousand **निवारकानि** those who remove / cure **विनाशकानि** those who destroy **उच्छिष्टम्** left over after being used **स्मर्तव्याः** worthy to be remembered **हिताहारविहारसेवी** one who eats good food and practises good conduct **समीक्ष्यकारी** one who behaves after thinking **दाता** donor **समः** one having feeling of equality **आप्तोपसेवी** one who serves person who are reliable **अरोगी** free fom disease, healthy

**(2) Sandhi :** अयमेवाचार्यः (अयम् एव आचार्यः) । चाधिकृत्य (च अधिकृत्य) । यदिहास्ति (यत् इह अस्ति) । यन्नेहास्ति (यत् न इह अस्ति) । उक्तेरयमर्थः (उक्तेः अयम् अर्थः) । विषयेष्वसक्तः (विषयेषु असक्तः) । भवत्यरोगी (भवति अरोगी) भवितुमर्हतीति (भवितुम् अर्हति इति) । तस्येदमुत्तरम् (तस्य इदम् उत्तरम्) ।

## Exercise

**1. विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) चरकसंहितायाः प्रकरणेषु कति अध्यायाः सन्ति ? ◯

(क) 120 (ख) 122 (ग) 100 (घ) 210

(2) हिताहारविहारसेवी नरः कीदृशो भवति ? ◯

(क) अरोगी (ख) विद्वान् (ग) आप्तसेवी (घ) बलवान्

(3) 'ज्वरः' शब्दस्य अर्थः कः ? ◯

(क) zavera (ख) fever (ग) little (घ) old age

(4) 'उचितः' शब्दस्य विरुद्धार्थः कः ? ◯

(क) निश्चिंतः (ख) अरुचिः (ग) सूचितः (घ) अनुचितः

(5) 'रोगरहित:' शब्दस्य समासप्रकारं लिखत ।

(क) षष्ठी तत्पुरुष (ख) द्वितीया तत्पुरुष (ग) तृतीया तत्पुरुष (घ) पञ्चमी तत्पुरुष

(6) 'कुत्रापि' शब्दस्य योग्यसन्धिविच्छेदं दर्शयत ।

(क) कुत्रा + अपि (ख) कुत्र + अपि
(ग) कु + तत्र + अपि (घ) कु + त्रापि

**2. एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

(1) आचार्यचरकस्य क: ग्रन्थ: सुप्रसिद्ध: वर्तते ?

(2) चरकस्य ग्रन्थे कस्य व्याख्यानं वर्तते ?

(3) औषधस्य आवश्यकता कदा भवति ?

(4) स्वास्थ्ये कस्य प्रभावो भवति ?

**3. रेखाङ्कितपदानि आधृत्य प्रश्नवाक्यं रचयत ।**

(कस्य, केन, क:, कस्मै)

(1) चरकाचार्यस्य चरकसंहितानामक: सुप्रसिद्ध: ग्रन्थ: वर्तते ।

(2) चरकाचार्य: भारते औषधविज्ञानस्य प्रवर्तक: इति मन्यते ।

(3) मानवेन सम्यक् व्यवहार: करणीय: ।

**4. वर्गसहितं अनुनासिकपदं लिखत ।**

**उदा.** संजात: च वर्ग: सञ्जात:

(1) परंतु ............... ............... (2) तदानींतनम् ............... ...............

(3) संमिल्य ............... ............... (4) अंगम् ............... ...............

**5. स्वभाषायाम् अनुवादं कुरुत ।**

(1) आयुर्वेदस्य प्राचीनतमेषु विश्वविख्यातेषु च ग्रन्थेषु अस्य गणना भवति ।

(2) अत्र प्राय: सहस्रद्वयम् औषधयोगानां विस्तृतं व्याख्यानमस्ति ।

(3) निखिलमपि आयुर्वेदसाहित्यम् आचार्यचरकस्य उच्छिष्टमस्ति ।

(4) य: नर: हितस्य आहारस्य विहारस्य च सेवनं करोति स: रोगरहितो भवति ।

(5) यदा रोग: शरीरे प्रविष्टो भवति तदा औषधस्य आवश्यकता भवति ।